## द्वितीय वर्ष, चतुर्थ सत्रार्द्ध

**पाठ्यांश – ०४** | **अध्ययनांक - ०४**

(Course – 04 ) | (Total Credits–04)

### धर्मशास्त्रस्य परिचयः

क्रेडिट – १ (16 – घण्टाः )

(अत्र प्रथमः पाठः धर्मशास्त्रस्य परिचयः द्वितीये च पाठे पुराणेतिहासस्य परिचयः निर्धारितः वर्तते)

**१. धर्मस्वरूपम् -**

१.१ धर्मशब्दस्य व्युत्पत्तिः,

१.२ धर्मलक्षणम्,

१.३ धर्मस्य भेदाः,

**२. धर्मे प्रमाणानि -**

२.१ श्रुतिः (विधिः, अर्थवादः, मन्त्रः, नामधेयम्)

२.२ स्मृतिः,

२.३ सदाचारः

२.४ दशकं धर्मलक्षणम्

२.४.१ धृतिः,

२.४.२ क्षमा,

२.४.३ दमः,

२.४.४ अस्तेयम्,

२.४.५ शौचम्,

२.४.६ इन्द्रियनिग्रहः,

२.४.७ धीः,

२.४.८ विद्या,

२.४.९ सत्यम्,

२.४.१० अक्रोधः,

**३. धर्मशास्त्रस्यपरिचयः -**

३.१ धर्मशास्त्रस्य परिभाषा,

३.२ धर्मशास्त्रस्य प्रयोजनम्,

३.३ धर्मशास्त्रस्य वैशिष्ट्यम्,

**४. धर्मशास्त्रस्य वर्गीकरणम् -**

४.१ सूत्रम् ,

४.२ स्मृतिः,

४.३ निबन्धः,

**५. सूत्रग्रन्थानां परिचयः-**

५.१ धर्मसूत्राणि

५.१.१ गौतमधर्मसूत्रम्

५.१.२ आपस्तम्बधर्मसूत्रम्

५.२ गृह्यसूत्राणि

५.२.१ पारस्करगृह्यसूत्रम्

५.२.२ आपस्तम्बगृह्यसूत्रम्

.................................

## ख - खण्डः
## स्मृतिशास्त्रस्य परिचयः

**१. स्मृतिग्रन्थानां परिचयः -**

१.१ मनुस्मृतिः,

१.२ याज्ञवल्क्यस्मृतिः,

१.३ नारदस्मृतिः,

**२. निबन्धग्रन्थानां परिचयः -**

२.१ भगवन्तभास्करः,

२.२ निर्णयसिन्धुः,

२.३ धर्मसिन्धुः,

**३. स्मृतिशास्त्रस्य प्रतिपाद्यविषयाः -**

३.१ आचारः,

३.२ व्यवहारः,

३.३ प्रायश्चित्तम्,

**४. आश्रमाणां परिचयः-**

४.१ ब्रह्मचर्याश्रमः

४.२ गृहस्थाश्रमः

४.३ वानप्रस्थाश्रमः

४.४ सन्यासाश्रमः

**५. प्राचीनन्यायव्यवस्थायाः वैशिष्ट्यम्**

..................................

# धर्मशास्त्रस्य परिचयः (खण्डः - क)

# स्मृतिशास्त्रस्य परिचयः (खण्डः - ख)


**CENTRAL SANSKRIT UNIVERSITY**

(Established by an Act of Parliament of India)

New Delhi

# धर्मशास्त्रस्य परिचयः

## १. धर्मस्वरूपम्

**१.१ धर्मशब्दस्य व्युत्पत्तिः –** धृञ् धारणे इति धातोः “मन्” प्रत्यये सति धर्मशब्दः निष्पन्नः । ध्रियते अनेन लोकः, धरति विश्वं वा इति धर्मः । जगतः उत्पत्तिस्थितिकारण इति यावत् । **यतो अभ्युदयनिःश्रेयससिद्धिः स धर्मः ।** इतिधर्मशब्दस्य निष्पत्तिः ।

**१.२ धर्मलक्षणम् –** लक्ष्यते ज्ञायते अनेन इति लक्षणम् । करणे ल्युप्रत्ययः । धर्मस्यलक्षणम् – धर्मलक्षणमिति षष्ठीसमासः । यतो अभ्युदयनिःश्रेयससिद्धिः स धर्मः । (वै.सू)

धारणाद्धर्मः – (म.भा.)

चोदनालक्षणोऽर्थो धर्मः । (जै.सू)

अहिंसा परमो धर्मः (बौ.सि.)

आचारः परमो धर्मः । (वि.स.)

यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः। स धर्मः ॥

**विद्वद्भिः सेवितः सद्भिः, नित्यमद्वेषरागिभिः ।**

**हृदयेनाभ्यनुज्ञातो यो स धर्मः । (म.स्मृ.2.1)**

मनुना प्रोक्तं धर्मसामान्यलक्षणम् ।

**१.३ धर्मस्य भेदाः -** धर्मः सामान्यतः षढाविभक्तो दृश्यते । याज्ञवल्क्यस्मृतौ आद्यश्लोके - याज्ञवल्क्यशिष्याः महर्षिणं गुरुं याज्ञवल्क्यं पृच्छन्ति – वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषपतः (या.व.स्मृ.॥) इति । अत्र वर्णाः – ब्राह्मणादयः, आश्रमाः - ब्रह्मचारिप्रभृतयः, इतरधर्मशब्देन षड्विधस्स्मार्तधर्माः गृह्यन्ते इत्युक्तं मिताक्षरायां भगवता विज्ञानेश्वरेण ।

यथा - १) वर्णधर्मः, २) आश्रमधर्मः, ३) वर्णाश्रमधर्मः, ४) गुणधर्मः, ५) निमित्तधर्मः, ६) साधारणधर्मश्चेति ।

१) तत्र वर्णधर्मो – ब्राह्मणो नित्यं मद्यं त्यजेदित्यादि ।

२) आश्रमधर्मः – अग्नीन्धनभैक्षाचर्यादिः ।

३) वर्णाश्रमधर्मः – पालाशो दण्डो ब्राह्मणस्येत्येवमादिः ।

४) गुणधर्मः – शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादि ।

५) निमित्तधर्मः – विहिताकरणप्रतिषिद्धसेवनादिनिमित्तं प्रायश्चित्तम् ।

६) साधारणधर्मः – "सत्यं वद" – इत्यादिश्रुतिबोधितसत्यकथनम् । तथा "मा हिंस्यात्सर्वाभूतानि" इत्यादिनिषेधशास्त्रबोधितः अहिंसादिश्च । इति ॥

**२. धर्मे प्रमाणानि -**

**२.१ - श्रुतिः (विधिः, अर्थवाद; मन्त्रः, नामधेयम्)**

धर्मप्रमाणानि प्रदर्शयन् मनुराह -

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् (म.स्मृ.- 2.6) । इत्यादिना । अग्रे वेदशब्दस्य श्रुतिरिति पर्यायत्वं सूचितवान् दशमे श्लोके ।

श्रुतिस्तु वेदो विज्ञेयः (म.स्मृ.- 2.10), इत्यादिना । अपौरुषेयं वाक्यं वेदः । स च वेदः ऋग्यजुस्सामाथर्वभेदेन विभक्तः । स सर्वोऽपि विध्यर्थवादमन्त्रनामधेयभेदेन विभक्तः धर्मे प्रमाणम् ।

**१. विधिः** - अज्ञातार्थज्ञापकः वेदभागः – विधिः । स च प्रमाणान्तरेण अनधिगतमर्थ बोधयति। यथा - "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादिरुपः । अनधिगत-अबाधितार्थबोधकम् अपौरुषेयं वाक्यमिति तात्पर्यार्थः ।

**२. अर्थवादः -** विधेयस्य प्राशस्त्यबोधकं निषेध्यस्य अप्राशस्त्यबोधकं विधिसान्निधौ निषेधसन्निधौ वा श्रूयमाणं वेदवाक्यम् - अर्थवादः । प्राशस्त्यनिन्दान्यतरबोधकं वेदवाक्यमिति यावत् । अर्थवादानां विध्येकवाक्यतया धर्मे प्रामाण्यम् । यथा वायुर्वै क्षेपिष्ठा देवता इत्यादयः

अर्थवादाः वायव्ययागविधिसान्निधौ श्रूयमाणाः । “वायव्ययागः प्रशस्तः” इत्यादिना विधेयप्राशस्त्यबोधकत्वेन विध्येकवाक्यतया धर्मप्रमाणभूताः ।

**३. मन्त्रः -** कर्मसमवेतार्थप्रकाशकत्वं मन्त्रलक्षणम् । मन्त्राणामिदमेव दृष्टं प्रयोजनम्। येषां मन्त्राणां अर्थः नास्ति (साममन्त्राणां वा स्तोभाक्षरादीनां वा) तेषां परम् उच्चारणमात्रं अदृष्टं प्रयोजनम् । मन्त्राणां प्रयोगकाले अनुष्ठेयार्थस्मारकत्वेन विधिवाक्यैकवाक्यतया धर्मे प्रामाण्यम् ।

**४. नामधेयम् -** नामधेयानां विधेयार्थपरिच्छेदकतया धर्मे, प्रामाण्यम् । नामधेयानां धात्वर्थे अभेदसबन्धेन अन्वयः । अग्निहोत्राभिन्नेन यागेन इष्टं भावयेत् इत्यादिना अर्थभावनायां करणत्वेन अन्वयः । सङ्कल्पादौ विधेयार्थपरिच्छेदकत्वेन नामधेयानां धर्मे प्रामाण्यम् । एवञ्च सर्वस्यापि वेदभागस्य यथार्थानुभवकरणत्वरुपं प्रामाण्यं न्यायसिद्धम् ।

**२.२ स्मृतिः –** श्रुत्यर्थानुवादकं मन्वादि-ऋषिप्रोक्तं वचनं स्मृतिः । स्मृतिर्नाम - धर्मशास्त्रम् । तदुक्तं मनुना - श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । (म-स्मृ-2-10) इत्यादिना । स्मृतेः वेदमूलकतया धर्मे प्रामाण्यम् । वेदविरुद्धायाः तथा लोभादिमूलकस्मृतेश्च श्रुतिविरुद्धत्वादेव धर्मे प्रामाण्यं नाङ्गीक्रियते ।

यस्याः स्मृतेः मूलभूता श्रुतिः नोपलभ्यते तस्याः स्मृतेः यावत्पर्यन्तं मूलश्रुतिः नोपलभ्यते नावत्पर्यन्तम् अननुष्ठानलक्षणम् अप्रामाण्यम् । मूलश्रुतेः प्राप्त्यनन्तरम् अनुष्ठानमिति तात्पर्यार्थः।

**२.३ सदाचारः -** शिष्टानामाचारः धर्मे प्रमाणम् । तस्यैव सदाचारः इति व्यवहारः ।
सदाचारोऽपि धर्मे प्रमाणम् । तदुक्तं मनुना –

**"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति (म.स्मृ.2-6)**

अत्र साधूनामाचारः इत्यनेन सदाचारः कथितः।

स च धर्मे प्रमाणम् । आचारः - कम्बलवल्कलाद्याचरणरूपः – स च आचारः साधूनाम् – धार्मिकाणाम् । आचारश्च स्मृत्यविरुद्ध एव भवेत् । स्मृत्यादिविरुद्धस्य आचारस्य अप्रामाण्यमेव । आचारः होलाकाद्याचाराः । आचारेण स्मृतिं कल्पयित्वा स्मृत्या श्रुतिं कल्पयित्वा धर्मे प्रामाण्यम् । अतः स्मृत्यपेक्षया दुर्बलं प्रमाणम् । स्मृत्याचारयोः परस्पर विरोधे स्मृतेरेव प्राबल्यात् आचारस्य तदा अप्रामाण्यमेव । श्रुतिस्मृत्यविरुद्धस्य आचारस्य धर्मे प्रामाण्यम् । तादृश एव आचारः सदाचार इति कथ्यते । स च धर्मे प्रमाणम् । धर्मप्रमाणेषु अन्यतममिति यावत् ।

**२.४ दशकं धर्मलक्षणम् -**

मनुस्मृतौ - षष्ठाध्याये - आश्रमधर्मकथनवेलायां गृहस्थाश्रमस्य श्रेष्ठत्वेन प्रशंसा कृता । यथा - ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ (म.स्मृ 6.87)

ब्रह्मचर्यादयः एते चत्वारः आश्रमाः गृहस्थाश्रमजन्याः तदाश्रिताः भवन्तीति ।

तथैव –

**सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।**

**गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ॥ (म.स्मृ. 6.89)**

ब्रह्मचर्यादीनामेतेषां मध्ये गृहस्थः श्रेष्ठ उच्यते मन्वादिभिः । यस्मात् ब्रह्मचारिवानप्रस्थयतीन् असौ भिक्षादानादिना पोषयति तस्मात् असौ श्रेष्ठः । तदपि पूर्वं मनुनैव प्रदर्शितम् - "यस्मात् त्रयोप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्" इत्यादिना । एतैः सर्वैरपि आश्रमिभिः दशविधः धर्मः सततमनुष्ठेयः इत्यापि सूचितम् ।

**चतुर्भिरपि चैवैतैः नित्यमाश्रमिभिर्द्विजैः ।**

**दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ॥ (म.स्मृ. 6.91)**

ब्रह्मचार्यादिभिः आश्रमिभिः चतुर्भिरपि द्विजातिभिः दशविधस्वरूपो धर्मः प्रयत्नतः सततम् (नित्यम्) अनुष्ठेयः इति । दशलक्षणकः धर्मः प्रदर्शितः -

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।**

**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् । इति । (म.स्मृ. 6.92)**

तदुक्तं "दशकं धर्मलक्षणम् इति ।

अत्र लक्षणशब्दः स्वरूपपरः । धर्मस्वरूपमिति यावत् । तच्च दशविधं धर्मस्वरूपं तु -

२-४-१. धृतिः - सन्तोषो धृतिः ।

२.४.२. क्षमा - परेण कदाचित् अपकारे कृते तस्य प्रत्यपकारस्य अनाचरणम् ।

२.४-३. दमः – विकारहेतुविषयसन्निधानेऽपि अविक्रियत्वं मनसो दमः । "मनसो दमनं दमः" इति वचनान्तरं च । शीतातपादिद्वन्द्वसहिष्णुता - दमः इत्यपि ।

२.४.४ अस्तेयम् - अन्यायेन परधनादिग्रहणं – स्तेयम् । तद्भिन्नम् अस्तेयम् ।

२.४.५ - शौचम्- यथाशास्त्रं मृज्जालादिना देहशोधनं शौचम् ।

२.४.६ - इन्द्रियनिग्रहः - विषयेभ्यः चक्षुरादिवारणम् इन्द्रियनिग्रहः ।

२.४.७ - धीः – शास्त्रादितत्वज्ञानं धीः।

२.४.८ विद्या - आत्मज्ञानं-विद्या ।

२.४.९ सत्यम् – यथार्थाभिधानं सत्यम् ।

२.४.१० अक्रोधः – क्रोधहेतौ सत्यपि क्रोधानुत्पत्तिः – अक्रोधः ।

एते एव दशविधं धर्मस्वरूपम् ।

## ३. धर्मशास्त्रस्य परिचयः

### ३.१ धर्मशास्त्रस्य परिभाषा

मानवजीवनस्य सार्थक्यसम्पादनसाधनं धर्मः । धर्मबोधकं शास्त्रं धर्मशास्त्रम् । धर्मशास्त्रम् इत्युक्तौ स्मृतिः । स्मृत्यर्थ एव अविशेषेण धर्मशास्त्रम् । स्मृतिस्तु श्रुतिबोधितस्य धर्मस्य विवरणरूपा । अतः तात्पर्यगत्या श्रुतिबोधितः स्मृतिबोधितश्च धर्माधर्मरूपः अर्थः धर्मशास्त्रस्य विषयः । तदुक्तं मनुना –

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।**

**ते सर्वार्थेष्व मीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥ इति । (म.स्मृ.2.10)**

स्मृतिरेव धर्मशास्त्रमिति पर्यायत्वं सूचितम् । ते च धर्मशास्त्ररूपाः स्मृतिग्रन्थाः अनेके सन्ति । तेषु प्राधान्येन धर्मशास्त्रप्रयोजकाः अथवा प्रवर्तकाः ऋषयः इमे सन्ति । तदुक्तं याज्ञवल्क्यस्मृतौ –

**मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।**

**यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥**

**पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।**

**शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ इति । (या.व.स्मृ.आ.अ 4,5)**

मनुः, अत्रिः, विष्णुः, हारीतः, याज्ञवल्क्यः, उशनाः, अङ्गिराः, यमः, आपस्तम्बः, संवर्तः, कात्यायनः, बृहस्पतिः, पराशरः, व्यासः, शङ्खः, लिखितः, दक्षः, गौतमः, शातातपः, वसिष्ठश्च एते धर्मशास्त्रस्य प्रणेतारः अथवा प्रवर्तकाः । एतत्तु प्रदर्शनमात्रम् । बोधायनादेरपि प्रवर्तकत्वमविरुद्धम् ।

चतुर्दशविद्यास्थानेषु धर्मशास्त्रमपि अन्तर्गतम् । तदुक्तं याज्ञवल्क्यस्मृतौ –

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति । (या.व.स्मृ.आ.अ.3)

विद्यापुरुषार्थसाधनानि, तासां विद्यानां स्थानानि च चतुर्दश, धर्मस्य च चतुर्दश स्थानानि हेतवः । एतानि च अध्येतव्यानि । तदन्तर्भूतत्वात् धर्मशास्त्रमपि अध्येतव्यम् । तत्रैतानि विद्याप्राप्तये धर्मानुष्ठानाय च अधिगन्तव्यानीत्याह याज्ञवल्क्यस्मृतिव्याख्याता-विज्ञानेश्वरभिक्षुः मिताक्षरायाम् । तस्मात् धर्मशास्त्राध्ययनं धर्मानुष्ठानार्थं विद्याप्राप्तिप्रयोजनार्थमपि कर्तव्यमिति शास्त्रसिद्धः अभिप्रायः ।

### ३.2 धर्मशास्त्रस्य प्रयोजनम् –

धर्मशास्त्रस्य प्रयोजनं विशिष्य धर्मानुष्ठानपरिज्ञानम् । एवमेव पुरुषार्थसाधनानां विधानां प्राप्तिः । अत्र विद्यापदेन मोक्षसाधनीभूतम् आत्मतत्वज्ञानं विवक्षितम् । 'ज्ञानादेव हि कैवल्यम्' इति वचनात् । धर्मशास्त्रं च नित्य-नैमित्तिककर्मानुष्ठानबोधकम् । नित्य-नैमित्तिककर्मणोः पापक्षय एव फलम् । तदुक्तं मीमांसावार्तिककारैः 'नित्य-नैमित्तिके कुर्यात् प्रत्यवायजिहासया इति पापक्षयः नित्य-नैमित्तिकयोः फलम् । चित्तस्य मलमिति पापविशेष एव । तस्य शुद्धिः नित्यनैमित्तिककर्मभिः । मनः यदा शुद्धं संस्कृतं भवति तदैव तत्वज्ञानसम्पादनार्हता सिध्यति । धर्मशास्त्रस्य प्रयोजनं तु धर्मज्ञानम् । ज्ञानेन धर्मानुष्ठानम् । अनुष्ठानेन च फलसिद्धिः इति क्रमः । एवञ्च परमं प्रयोजनं तु धर्मज्ञानद्वारा धर्मानुष्ठानम् । नित्यनैमित्तिकानुष्ठानेन पापक्षयद्वारा चित्तशुद्धिः, तेन तत्वज्ञाने योग्यताः, ततः तत्वज्ञानद्वारा मोक्षः इत्येवं परम्परया धर्मशास्त्रस्य मोक्षप्रयोजकत्वं सिध्यति । आनुषङ्गिकान्यपि प्रयोजनानि ऐहिकानि सन्ति । काम्यव्रतादीन्यपि धर्मशास्त्रे विहितानि । तेषाम् अनुष्ठानद्वारा ऐहिकानि पशुपुत्रधनकनकादीनि फलानि लभ्यन्ते इति धर्मशास्त्रस्य ऐहिकामुष्मिकोभयरूपफलसाधनत्वम् ।

### ३.३ धर्मशास्त्रस्य वैशिष्ट्यम् -

अस्य जगतः उत्पत्तिस्थितिलयकारणं धर्मः इत्याह भगवती श्रुतिः । तदुक्तं महानारायणोपनिषदि 'धर्मे सर्वं प्रतिष्ठितम्' इत्यादिना । धर्मस्य महत्त्वं प्रतिपादितं श्रीमद्रामायणे **"धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम् । धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥"** इत्यादिना इदं जगत् धर्मस्य सारभूतमित्यर्थः । धर्ममाधारीकृत्यैव अयं प्रपञ्चः अग्रे सरति । तादृशस्य गुणविशेषविशिष्टस्य धर्मस्य अवबोधकं शास्त्रं धर्मशास्त्रम् । 'धर्मशास्त्रं तु वै स्मृतिः' इत्यादिना स्मृतिरेव धर्मशास्त्रमित्याह भगवान् मनुः । धर्मे प्रमाणं तु अपौरुषेयः वेद एव । तदुक्तं मनुना –

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**

**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति । (म.स्मृ.2.6) इति ॥**

ऋग्यजुःसामाथर्वरूपः सर्वोऽपि वेदः धर्मे प्रमाणम् । वेदपदेन वेदमूलकाः स्मृत्यादयश्च गृह्यन्ते । धर्मलक्षणमुक्तं मनुना –

**विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः ।**

**हृदयेनाभ्यनुज्ञातो यो धर्मः तं निबोधत ॥ (म.स्मृ.2.1)**

अस्य अयमभिप्रायः विद्वद्भिः वेदविद्भिः, सद्भिः धार्मिकैः, रागद्वेषशून्यैः अनुष्ठितो हृदयेन आभिमुख्येन ज्ञातः इति, अनेन श्रेयःसाधनत्वमभिहितम् । वेदविद्भिर्ज्ञातः इति विशेषणोपादानसामर्थ्यात् ज्ञातस्य वेदस्यैव श्रेयःसाधनज्ञाने कारणत्वं विवक्षितम् । अतो वेदप्रमाणकः श्रेयःसाधनं धर्मः इत्युक्तम् । एवं विधो यो धर्मः तं निबोधत इत्यर्थः । अत एव हारीतः – 'अथातो धर्मं व्याख्यास्यामः' श्रुतिप्रमाणको धर्मः । श्रुतिश्च द्विविधा – 'वैदिकी तान्त्रिकी च' इति । भविष्यपुराणे अस्य विवरणम् एवं लभ्यते –

धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्षणम् । स तु पञ्चविधः प्रोक्तो वेदमूलः सनातनः ॥

अस्य सम्यगनुष्ठानात् स्वर्गो मोक्षश्च जायते । इह लोके सुखैश्वर्यमतुलं च खगाधिप ॥ इति ।

श्रेयःसाधनमित्यर्थः । जैमिनिरपि धर्मलक्षणमसूत्रयत् – 'चोदनालक्षणोऽर्थो धर्मः' इति । उभयमिह चोदनया लक्ष्यते अर्थोऽनर्थश्च । अर्थः श्रेयस्साधनं ज्योतिष्टोमादिः, अनर्थः प्रत्यवायसाधनं श्येनादिः । वेदप्रमाणकं श्रेयःसाधनं ज्योतिष्टोमादिधर्मः इति सूत्रार्थः । स्मृत्यादयोऽपि वेदमूलकत्वेनैव धर्मे प्रमाणम् । हृदयेनाभ्यनुज्ञातः इति अन्तःकरणविचिकित्साशून्यः इति । एवं च वेदविद्भिः अनुष्ठितः श्रेयःसाधनः संशयरहितश्च धर्मः इति धर्मलक्षणं पर्यवस्यति । तादृशः धर्मः अभ्युदयनिःश्रेयसहेतुः। तद्बोधकं शास्त्रमिति धर्मशास्त्रस्य वैशिष्ट्यम् । विद्याप्राप्तिः धर्मानुष्ठानं च धर्मशास्त्रस्य प्रयोजनम् । ऐहिकामुष्मिकफलसाधनत्वेन धर्मशास्त्रं भारतीये सनातनवैदिकवाङ्मये विशिष्टं स्थानं प्राप्तमस्ति ।

## ४. धर्मशास्त्रस्य वर्गीकरणम्

४.१ **सूत्रम्** – धर्मशास्त्रवाङ्मयं त्रिभिः प्रस्थानैः विभक्तं दृश्यते । तत्र आद्यं प्रस्थानं भवति सूत्रप्रस्थानम् । सूत्रं च सूचनात् सूत्रम् । विवक्षितः विषयः संक्षेपेण सूच्यते इति सूत्रम् । धर्मशास्त्रे सूत्रमित्युक्तौ कल्पसूत्रम् । कल्प्यते निरूप्यते प्रयोगस्वरूपमत्र इति कल्पसूत्रम् । श्रौतसूत्रं-गृह्यसूत्रं-धर्मसूत्रं-शुल्बसूत्रमिति मिलित्वा कल्पसूत्रमिति व्यवहारः । वेदबोधितयज्ञयागादिप्रयोगबोधकं श्रौतसूत्रम् । यथा – 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'चित्रया यजेत पशुकामः' इत्यादिभिः वेदवाक्यैः ज्योतिष्टोमादयः यागाः बोधिताः । तेषाम् अनुष्ठानस्य स्वरूपक्रमादिकं सर्वमत्र श्रौतसूत्रेष्वेव निरूप्यते । गृह्यकर्मणाम् अनुष्ठानबोधकानि गृह्यसूत्राणि । गृह्याग्निः औपासनाग्निः । अयं च विवाहसंस्कारे सिद्धोऽग्निः । एकाग्निसाध्यकर्माणि इति यावत् । तानि च विशेषेण चौलोपनयनविवाहादीनि अनुष्ठेयधर्मबोधकानि सूत्राणि धर्मसूत्राणि । तानि च बोधायनापस्तम्बाश्वलायनादीनि धर्मानुष्ठानस्वरूपविशेषादिबोधकानि ।

**शुल्बसूत्राणि** - केवलं यजुर्वेदीय कल्पसूत्रमात्रे विद्यमानानि शुल्बसूत्राणि यज्ञशाला-यज्ञकुण्डादि-निर्माणापेक्षित-गणितादिबोधकानि । इमानि केवलं याजुषकल्पसूत्रमात्रे विद्यमानानि । यज्ञशालानिर्माणादिकं तु यजुर्वेदे एव विहितम् । याजुर्वेदिकमिति समाख्यया समाख्यानात् । कल्पसूत्राणां महत्त्वं कुमारिलभट्टपादैः तन्त्रवार्तिके कल्पसूत्राधिकरणे एवं प्रदर्शितम् –

**वेदादृतेऽपि कुर्वन्ति कल्पैः कर्माणि याज्ञिकाः ।**

**न तु कल्पैर्विना केचित् मन्त्रब्राह्मणमात्रकात् ॥ इति । (त.वा.क.सू.अ)**

अनेन वैदिककर्मानुष्ठाने कल्पसूत्राणां महत्वमवगम्यते । गृह्यसूत्राण्यपि संस्कारकर्मणामनुष्ठाने कालस्वरूपादिबोधकत्वेन उपकुर्वन्ति । धर्मसूक्ष्मबोधकत्वेन धर्मसूत्राणि सर्वत्र समाजे उत्तममार्गबोधकत्वेन धर्ममार्गप्रदर्शकतया समाजमुपकुर्वन्ति । धर्मशास्त्रे

वेदबोधितमर्थं स्मृतिबोधितमप्यर्थं च सूत्ररूपेण बोधयन्तीति धर्मशास्त्रे सूत्राणि विशिष्टं स्थानमावहन्ति ।

**४.२ स्मृतिः** – स्मृतिः मन्वादिभिः ऋषिभिः प्रणीतानां ग्रन्थानां नामधेयम् । वस्तुतः संस्कारमात्रजन्यं ज्ञानं स्मृतिः इति न्यायविदां कथनम् । कुमारिलभट्टपादैः तन्त्रवार्तिके –

पूर्वविज्ञानविषयज्ञानं स्मृतिरिहोच्यते । पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नावधार्यते ॥ इति ।

इन्द्रियादिजन्यं प्रत्यक्षादिकं ज्ञानं तस्य 'अनुभवः' इति व्यवहारः । अयं ज्ञानविशेषः । एवम् अनुभवेन यत् ज्ञानं जायते तच्च संस्काररूपम् । तदपि ज्ञानरूपमेव । तेन संस्कारेण उद्बोधसामग्रीदर्शनादिना यत् ज्ञानं जायते तस्य 'स्मृतिः' इति व्यवहारः । अत्रापि वेदार्थः अत्र निरूप्यते इति स्मृतिः । वेदार्थविषयकत्वात् स्मरणरूपत्वाच्च स्मृतिः । अतः स्मृतीनां वेदमूलकतया प्रामाण्यम् । वेदविरुद्धानां स्मृतीनामप्रामाण्यम् ।

पूर्वमीमांसायां स्मृत्यधिकरणे स्मृतीनां धर्मप्रामाण्यं स्थापितम् । तत्र स्मृतीनां वेदमूलकतया एव धर्मे प्रामाण्यम् उक्तम् । श्रुतिविरुद्धानां स्मृतीनां तु अप्रामाण्यमेव । स्मृतिः एव धर्मशास्त्रपदेन प्रसिद्धा । 'धर्मशास्त्रं तु वै स्मृतिः' इति वचनात् । मानवजीवनस्य आचारः, व्यवहारः, नीतिनियमाः विहितधर्मानुष्ठानादिकं सर्वमपि स्मृतिषु निबद्धम् । वेदार्थं सरलीकृत्य वेदतात्पर्यार्थं सामान्यमतीनां जनानाम् अवबोधार्थं निरूपयामासुः स्मृतिकाराः मन्वादयः महर्षयः।

४.३ **निबन्धः** – धर्मशास्त्रे तृतीयं प्रस्थानं निबन्धप्रस्थानम् । श्रुत्यर्थः स्मृतिषु निबद्धः । एवं स्मृत्यर्थसारः अत्यन्तं विस्तृतरूपेण निबन्धग्रन्थेषु प्रतिपादितः । अत एव निबन्धशब्देन व्यवहारः। निबन्धग्रन्थेषु न केवलं स्मृत्यर्थः निबद्धः किन्तु क्वचित् पुराणादिसिद्धा अपि धर्मसम्बद्धविषयाः विवृताः । निबन्धग्रन्थेषु निर्णयसिन्धुः, धर्मसिन्धुः, वीरमित्रोदयः, भगवन्तभास्करः इत्यादयः बहवो ग्रन्थाः प्रसिद्धाः । तत्र विभिन्नस्मृतिषु प्रतिपादिताः विषयाः विवेचिताः । विशेषतः कालविषये चैत्रादिमासेषु विहितानां नित्यनैमित्तिकानाम् उपाकर्मादिरूपाणां व्रतादीनां च

कालस्वरूपादिविषये च शास्त्रविरुद्धमतान्तरनिरासपूर्वकं शास्त्रशिष्टाचारादिसम्मताभिप्रायं स्पष्टं प्रदर्शितवन्तः ।

आशौचादिविषये तथा श्राद्धादिविषये विवाहोपनयनादिसंस्कारविषयादौ च स्मृतिषु विवरणं लभ्यते चेदपि तेषां स्पष्टप्रतिपत्तिः निबन्धग्रन्थेभ्य एव जायते । आशौचादिविषये सन्देहे सति निबन्धग्रन्थानेव पश्यन्ति । तथैव शिष्टसम्प्रदायः । तत्र कारणन्तु स्पष्टरूपेण निर्णयः तत्रैव लभ्यत इति । विशेषतः उत्तरसंस्कार(अपरसंस्कारः)विषये तथा दायविभागविषये, प्रायश्चित्तविषये वर्णधर्मविषये, आश्रमधर्मविषये दत्तकपुत्रादिविषये तथा नित्यनैमित्तिककर्मानुष्ठानादिविषयादौ च निबन्धग्रन्था एव प्रमाणत्वेन निर्णयं प्रतिपादयन्ति । एवमेव स्मृत्यर्थः यथा निबद्धः तथा पुराणादिप्रसिद्धाः अनुष्ठेयत्वेन विहिताः श्रेयस्साधनीभूता अर्था अपि निबन्धग्रन्थेषु प्रदर्शिता इति निबन्धग्रन्थाः धर्मशास्त्रे विशिष्टं स्थानमावहन्ति ।

## ५ – सूत्रग्रन्थानां परिचयः

### ५.१ धर्मसूत्राणि

#### ५.१.१ गौतमधर्मसूत्रम्

मनुष्यस्य श्रेयःसाधनं धर्मः । धर्मः श्रुतिस्मृतिपुराणादिबोधितः । सूचनात् सूत्रम् । धर्मबोधकं सूत्रं धर्मसूत्रम् । धर्मसूत्रं कल्पसूत्रान्तर्गतम् । श्रौतसूत्रं वेदविहितयज्ञादीनां प्रयोगबोधकम् ।

गृह्यसूत्रम् एकाग्निसाध्यकर्मणामथवा गृह्याग्निसाध्यानां संस्कारादिकर्मणां प्रयोगस्वरूपादिबोधकम् ।

धर्मसूत्रम् – धर्मानुष्ठानबोधकम् ।

शुल्बसूत्रम् – यज्ञवेदिकायाः यज्ञकुण्डादीनां च निर्माणबोधकम् । तानि च ऋषिभिः निर्मितानि वेदबोधिकधर्मबोधकानि धर्मसूत्राणि अनेकानि सन्ति । तेषु गौतममहर्षिणा प्रणीतं गौतमधर्मसूत्रम् अन्यतमम् ।

अत्र त्रयः प्रश्नाः सन्ति ।

प्रथमप्रश्ने – धर्मप्रमाणविचारः, त्रयाणां वर्णानाम् उपनयनकालादिविचारः, ब्रह्मचारिनियमाः, उपनीतानुपनीतव्यक्तेः नियमविचारः, आश्रमविचारः, गृहस्थाश्रमस्य महत्वम्, सन्यासिनियमाः, वानप्रस्थविचारः, विवाहविचारः, गर्भाधानसंस्कारः, पञ्चमहायज्ञविचारः, अभिवादननियमः, विद्याग्रहणविचारः, संस्काराणां संख्याविचारः, व्रतपालननियमाः, शौचाचारविचारः इत्यादयः विचाराः सप्रसङ्गं निरूपिताः ।

द्वितीयप्रश्ने – चतुर्णामाश्रमाणां कर्तव्यविचारः, राज्ञः कर्तव्यविचारः, दण्डविधिपरामर्शः, साक्षिनिर्णयः, आशौचविचारः, श्राद्धस्वरूपविचारः, वेदाध्ययननियमाः, भक्ष्याभक्ष्यविचारः, स्त्रीधर्मः इत्यादयः विचाराः विचारिताः ।

तृतीयप्रश्ने – प्रायश्चित्तविचारः, पातकभेदेन प्रायश्चित्तविमर्शः, महापातकानामुपपातकानां च प्रायश्चित्तविचारः, कृच्छ्राणां विचारः, दायविभागः, तस्य कालः तत्र नियमाः इत्यादयः चिन्तिताः। इत्येवं गौतमधर्मसूत्रस्य विषयसंक्षेपः ।

### ५.२.२ – आपस्तम्बधर्मसूत्रम्

धर्मबोधकं सूत्रं धर्मसूत्रम् । आपस्तम्बमहर्षिणा विरचितं धर्मसूत्रम् आपस्तम्बधर्मसूत्रम् । इदं च आपस्तम्बसूत्रं कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बद्धम् । इदं च धर्मसूत्रं कल्पसूत्रान्तर्गतम्। आपस्तम्बकल्पसूत्रे मिलित्वा त्रिंशत् प्रश्नाः सन्ति । तेषु अष्टाविंशतितमः प्रश्नः तथा एकोनविंशतितमः प्रश्नश्च धर्मविषयकौ इति धर्मबोधकत्वात् द्वौ प्रश्नौ धर्मसूत्रपदेन प्रसिद्धौ । उभयत्रापि एकादशपटलाः सन्ति । प्रथमप्रश्ने द्वात्रिंशत् कण्डिकाः सन्ति । द्वितीये प्रश्ने एकोनत्रिंशत् कण्डिकाः सन्ति । आपस्तम्बधर्मसूत्रे विषयविवेचनमेवं कृतमस्ति । यथा –

प्रथमप्रश्ने – सामयाचारिकधर्मविषयः, उपनयनसम्बद्धविचारः, तपः शब्दार्थः, ब्रह्मचारिधर्माः, अध्ययनस्य अनध्ययनस्य च विमर्शः, महायज्ञविषयः, गृहस्थाश्रमस्य कर्तव्यविचारः, भोज्यम् अभोज्यं च वस्तु, धर्माधर्मयोर्भेदः, अशुचिजनककर्मविचारः, आत्मज्ञानस्य महत्वम्, योगविचारः,

महापातकानां प्रायश्चित्तविचारः, ब्रह्मचर्यस्य कालावधिविचारः, स्नातकव्रतविचारः, अध्यापकनियमाः इत्यादयः अत्र परामृष्टाः ।

द्वितीयप्रश्ने – गृहस्थाश्रमविचारः, वर्णधर्मविचारः, वैश्वदेवविचारः, गुरुवन्दनविषयपरामर्शः, अतिथिसत्कारविषयः, भिक्षासम्बद्धविचाराः, विवाहविचारः, दायविभागसम्बद्धाः विषयाः, आशौचविचारः, श्राद्धप्रकरणम्, संन्यासिनां नियमविचारः, राज्ञः कर्तव्यानि, दण्डविचारः, दण्डनिर्णायकविषयः, साक्षिविषयः, धर्माचरणस्य महत्वम् इत्यादयः द्वितीयप्रश्ने परामृष्टाः । इत्येवम् आपस्तम्बधर्मसूत्रोक्तानां विषयाणां संक्षेपपरिचयः ।

## ५.२ गृह्यसूत्राणि

**५.२.१ पारस्करगृह्यसूत्रम् –** सर्वेषामपि गृह्यकर्मणाम् अनुष्ठानस्वरूपादिविषये निर्णायकं प्रमाणं गृह्यसूत्रम् । गृह्यकर्मशब्देन गृह्याग्निसाध्यकर्माणि गृह्यन्ते । गृह्याग्निः इत्यस्य औपासनाग्निः अथवा विवाहाग्निः इत्यर्थः । विवाहसंस्कारानन्तरं औपासनाग्निः सिध्यति । सीमन्तादिसंस्काराः सर्वेऽपि गृह्यकर्मशब्देन गृह्यन्ते । ते सर्वेऽपि संस्काराः गृह्याग्नौ (औपासनाग्नौ) अनुष्ठेयाः इदं च संस्कारानुष्ठानस्वरूपं गृह्यसूत्रभेदेन किञ्चिदिव भिद्यते । मन्त्रविनियोगे भेदः दृश्यते । क्वचित् हविषां भेदः । सामान्यतः स्वरूपं तु एकरूपमेव । प्रतिवेदं गृह्यसूत्राणि भिद्यन्ते । यथा ऋग्वेदस्य आश्वलायनगृह्यसूत्रम् । कृष्णयजुर्वेदस्य बोधायनगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, हिरण्यकेशीयगृह्यसूत्रमिति प्राधान्येन गृह्यसूत्रत्रयम् उपलभ्यते ।

गृह्यसूत्रं च कल्पसूत्रान्तर्गतम् । शुक्लयजुर्वेदे तु प्रसिद्धं गृह्यसूत्रं – पारस्करगृह्यसूत्रम् । तस्य ‘वाजसनेयगृह्यसूत्रम्’ ‘कातीयसूत्रम्’ अथवा कात्यायनगृह्यसूत्रमिति च व्यवहारः प्रवर्तते । शिष्टपरम्परायाम् आचार्यस्य कात्यायनस्यैव ‘पारस्करः’ इति मूलभूतं नामधेयमिति ।

अस्मिन् गृह्यसूत्रे सामान्यतः गृह्यसूत्रेषु ये विषयाः संस्कारादयः प्रतिपाद्यन्ते ते एव विषयाः निरूपिताः । अस्मिन् गृह्यसूत्रे काण्डत्रयं वर्तते । तत्रापि प्रथमकाण्डे एकोनत्रिंशत् (29)

कण्डिकाः अध्यायापरनामधेयाः विद्यन्ते । द्वितीयकाण्डे सप्तदश(17) कण्डिकाः वर्तन्ते । तृतीयकाण्डे पञ्चदश(15) कण्डिकाः सन्ति ।

प्रथमकाण्डे आवसथ्याधानम्, विवाहसम्बद्धविषयाः, मधुपर्कः, पाकयज्ञाः, नैमित्तिकप्रायश्चित्तम्, गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, मेधाजननम्, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम् इत्यादयः विषयाः सपरिकरं प्रतिपादिताः ।

द्वितीयकाण्डे चूडाकर्म, उपनयनम्, केशान्तः (गोदानम्), स्नातकव्रतानि, पञ्चमहायज्ञाः, उपाकर्मविचारः, अनध्यायाः, अध्यायोत्सर्गः, लाङ्गलयोजनम्, श्रवणाकर्म, इन्द्रयज्ञकर्म, पृषातकाकर्मविचारः सीतायज्ञादयः विचाराः अस्मिन् काण्डे विचारिताः ।

तृतीयकाण्डे नवान्नप्राशनकर्मविचारनिरूपणम्, आग्रहायणी, अष्टकाश्राद्धविचारः, शालाकर्म, मणिकावधानकर्म, शिरोरोगभेषजं कर्म, दासवशीकरण-उपायविचारः, शूलगवः, वृषोत्सर्गः, उदककर्म (मृतसंस्कारः), पश्वालम्भविचारः, अवकीर्णिप्रायश्चित्तम्(ब्रह्मचर्यभङ्गप्रायश्चित्तम्), सभाप्रवेशविचारः, रथारोहणम्, अश्वारोहणम्, गजारोहणम्, उष्ट्रारासभारोहणम्, चतुष्पथनदीनौकाद्यभिमन्त्रणं च इत्यादयः विषयाः पारस्करगृह्यसूत्रे निरूपिताः ।

### ५.२.२ आपस्तम्बगृह्यसूत्रम्

आपस्तम्बाचार्येण विरचितम् इदं गृह्यसूत्रम् आपस्तम्बगृह्यसूत्रमिति प्रसिद्धम् । इदं च कृष्णयजुर्वेदीयतैत्तिरीयशाखासम्बद्धम् । गृह्यसूत्राणि गृह्यकर्मणां कालस्वरूपप्रयोगादिबोधकानि। औपासनाग्नौ क्रियमाणानि गृह्यकर्माणि । औपासनाग्निसाध्यानि इति वा व्याख्यानम् । स च औपासनाग्निः विवाहहोमे सिध्यति । गृहस्थाग्निः इत्यपि अस्य संज्ञा । तानि गृह्यकर्माणि च पुत्राणां गर्भाधानादिकम् उपनयनादिसंस्कारकर्माणि । प्रसङ्गात् एकाग्निसाध्यानि अन्यान्यपि शान्तिकपौष्टिकानि कर्माणि स्मृत्युक्तानि च अत्र बोधितानि ।

आपस्तम्बकल्पसूत्रे त्रिंशत् प्रश्नाः सन्ति । तत्र षड्विंशति सप्तविंशतिप्रश्नौ (26 & 27 प्रश्नौ) गृह्यसूत्रमिति विभागः । तत्रापि विशेषतः षड्विंशे प्रश्ने गृह्यकर्मसु विनियुक्ताः मन्त्राः तथा सप्तविंशे प्रश्ने गृह्यकर्मबोधकानि सूत्राणि ।

आपस्तम्बगृह्यसूत्रग्रन्थः अष्टौ पटलभेदेन विभक्तः । तत्रापि पुनः अवान्तरभेदः अध्यायापरनामतया खण्डशब्देन विभक्तः । ते च मिलित्वा त्रयोविंशतिखण्डाः सन्ति । विषयविवरणं तु एवं कृतं वर्तते – प्रथमपटले त्रयः खण्डाः सन्ति । तत्रापि विशिष्य प्रथमखण्डे आचारलक्षणविचारः तथा सामान्यतः पैतृककर्मविचारश्च प्रतिपादितः ।

द्वितीयखण्डे – होमे अग्निमुखप्रयोगभागस्य विचारः कृतः । तृतीयखण्डे विवाहे वरपूजा, मधुपर्कः, वधूवरयोर्गुणावगुणादयः विचारिताः ।

द्वितीयपटले – कन्यावरणविचारः, लाजाहोमादिकम्, वधूप्रवेशादिविचाराश्च विमृष्टाः ।

तृतीयपटले – स्थालीपाकहोमविचारः, तत्र देवता, वैश्वदेवविचारः, विवाहव्रतविचारः इत्यादयः विषयाः आमूलाग्रं विचारिताः ।

चतुर्थपटले – उपनयनविचारः, वटोः नियमाः, उत्सर्जनादिविचाराः प्रतिपादिताः ।

पञ्चमपटले – समावर्तनविचारः ।

षष्ठे पटले – सीमन्तसंस्कारः, पुंसवनसंस्कारविचारः, जातकर्मसंस्कारविचारः, नामकरणविचारः, अन्नप्राशनसंस्कारः, चौलकर्मविचारः, गोदानादिविचाराश्च प्रतिपादिताः ।

सप्तमे पटले – गृहनिर्माणविचारः, वास्तुहोमस्य विषयः, सर्पबलिः, स्थालीपाकविचारः, आग्रयणम्, प्रत्यवरोहणम्, ईशानबल्यादिविचाराश्च अत्र निरूपिताः ।

अष्टमे पटले – मासिश्राद्धविधिः, अष्टकापाकयज्ञविचारः, अपूपहवनविचारः, वपाहोमः, अन्वष्टकाकर्म, यात्राविचारः, अश्वहस्त्याद्यारोहणमन्त्रादिविचारः, फलीकरणहोमः, क्रोधशान्तिमन्त्राः, भृत्यसम्बद्धविचारः, वृक्षात् शिरसि फलं पतति चेत् तत्र प्रायश्चित्तमन्त्रप्रयोगः पक्षिमलादीनां शरीरोपरि पतने प्रायश्चित्तविचारादयः अत्र निरूपिताः । एवं क्रमेण आपस्तम्बगृह्यसूत्रे संस्कारकर्मणां विशेषरूपेण निरूपणं कृतम् ।

# ख – खण्डः

# स्मृतिशास्त्रस्य परिचयः

## १. स्मृतिग्रन्थानां परिचयः

### १.१ मनुस्मृतिः - संक्षिप्तपरिचयः

वेदबोधितस्य सूक्ष्मस्य धर्मतत्वस्य विवरणार्थं प्रवृत्ताः स्मृतयः । स्मृतीनां सर्वासां श्रुतिमूलकतया प्रामाण्यम् । अत्यन्तं प्राचीनस्मृतिग्रन्थेषु मनुस्मृतिः अन्यतमा वर्तते । यतो हि - अनेकासु स्मृतिषु विद्यमानासु का स्मृतिः धर्मप्रमाणत्वेन स्वीकर्तव्येति सन्देहे

"कृतौ तु मानवा धर्माः

त्रैतायां गौतमाः स्मृताः।

द्वापरे शङ्खलिखिताः

कलौ पाराशरी स्मृतिः ॥ (प.स्मृ.)

इत्यादिना पराशरस्मृतौ आद्ये कृतयुगे मनुस्मृतिः धर्मप्रमाणत्वेन ग्राह्या इति स्पष्टं निरूपितवन्तः । मनुस्मृतौ द्वादशाध्यायाः सन्ति ।

प्रथमाध्याये - स्थूलसूक्ष्मरूपेण समस्तस्यापि जगतः सृष्टिनिरूपणं कृतम् । मनुष्यदेवपित्रादीनां कालगणनाविचारः विमृष्टः । ब्राह्मणादिवर्णानां कर्तव्यादीनां तथा मनुशास्त्राध्ययनस्य फलं च विशेषतः विचारितानि ।

द्वितीयाध्याये - धर्मस्य सामान्यलक्षणम् धर्मप्रमाणानि च निरुपितानि । जातकर्मादिसंस्कारविचारः सपरिकरं प्रतिपादितः । वेदाध्ययनम्, जपयज्ञादिविचारः, गुर्वादीनाम् अभिवादनम् इत्यादयः परामृष्टाः ।

तृतीयाध्याये – ब्रह्मचर्यविचारः, गृहस्थाश्रमविधिः, अष्टविधविवाहभेदविचारः, पञ्चभूतस्वरूपं तदनुष्ठानविचारश्च श्राद्धविचारश्च इत्यादयः संप्रसङ्गं विवृताः ।

चतुर्थाध्याये - ब्रह्मचारिगृहस्थयोः कृत्याकृत्यविचारः । उत्सर्जनोपाकर्मविचारः, अध्ययननियमाः, भोज्याभोज्यविचारः इत्यादयः चतुर्थाध्याये चिन्तिताः ।

पञ्चमाध्याये - भक्ष्याभक्ष्यविचारः, आशौचविचारः, अर्थशौचस्य प्रशंसा, शुद्धिविचारः, पतिव्रतानियमाश्च पञ्चमाध्याये विचारिताः ।

षष्ठाध्याये - वानप्रस्थाश्रमविचारः, परिव्राजकधर्मविचार; आश्रमविवरणम्, इत्यादयः विचाराः षष्ठाध्याये विचारिताः ।

सप्तमाध्याये - राजधर्मविचारः सपरिकरः चिन्तितः ।

अष्टमाध्याये - विवादपरिहारः न्यायनिर्णयप्रकाराः साक्षिविचारः दण्डस्वरूपादिकं च सविस्तरम् आस्मिन् अष्टमाध्याये चिन्तितम् ।

नवमाध्याये - विशेषतः स्त्रीपुन्धर्माः स्त्रीणां लक्षणादिकं स्वयंवरविचारः सपरिकरं दायविभागविचारः, स्त्रीधनम्, द्वादशविधपुत्रस्वरूपविचारः, प्रायश्चित्तविचारः, वैश्यशुद्रयोः धर्मनिरुपणमित्यादयः अस्मिन्नवमाध्याये विचारिताः ।

दशमाध्याये - ब्राह्मणक्षत्रियादीना जीविकावृत्तिविचारः, सङ्करजातिविशेषस्य उत्पत्यादिकथनम्, जीवनहेतुविचारः, धनसञ्चयनस्वरूपादिकंच अस्मिन् दशमेऽध्याये विवृताः ।

एकादशाध्याये - स्नातकविभागः, सोमयागादियज्ञविचारः, पञ्चमहापातकानि, उपपातकानि, सम्बद्धानि प्रायश्चित्तानि, पापपरिहारकल्पविचाराश्च अस्मिन् एकादशाध्याये सम्यक् निरूपिताः ॥

द्वादशाध्याये - इह जन्मनि जन्मान्तरे वा कृतशुभाशुभकर्मफलवर्णनम् । कायिकवाचिकमानसिक कर्माणि, जीवात्मस्वरूपनिरूपणम्, सत्वरजस्तमोगुणानां कार्याणि

तत्रविशेषविचारः, मोक्षसाधनानां विवरणम्, धर्मविशेषविचारः, परिषत्स्वरूपम् - तपोविद्याभ्यां मोक्ष इत्यादयः सूक्ष्मविचाराः आस्मिन् द्वाद्वशाध्याये परामृष्टाः ।

इत्येवं रूपेण द्वादशाध्यायात्मकस्य मनुस्मृतिग्रन्थस्य संक्षेपेण सामान्यपरिचयोऽत्र कृतः। विशेषरूपेण विवरणन्तु मूलग्रन्थाध्ययनेन प्राप्यते । एतावता सामान्यपरिचयप्राप्त्या मूलग्रन्थाध्ययने

सारल्यमनुभूयते ।

**१.२ याज्ञवल्क्यस्मृतिः - संक्षिप्तपरिचयः**

महर्षिणा याज्ञवल्क्येन विरचिता इयं स्मृतिः “याज्ञवल्क्यस्मृतिः” । प्राचीनस्मृतिग्रन्थेषु अन्यतमा इयं स्मृतिः । सर्वासां स्मृतीनां श्रुतिमूलकतया धर्मे प्रामाण्यम् । श्रुतिसिद्धानां अनुष्ठेयत्वेन विहितानां धर्माणां, परित्यक्तव्यत्वेन विहितानाम् अधर्माणां च बोधनमेव स्मृतीनां प्रधानमुद्देश्यम् ।

अस्यां याज्ञवल्क्यस्मृतौ प्राधान्येन त्रयः विषयाः विवृताः । ते च विषयाः पृथक् अध्यायमुखेन प्रदर्शिताः । यथा –

१) आचाराध्यायः

२) व्यवहाराध्यायः

३) प्रायश्चित्ताध्यायः । इति ।

सर्वेषु अध्यायेषु सम्बद्धाः अवान्तरविषयाः विस्तरेण निरूपिताः ।

प्रथमे आचाराध्याये – प्रथमे उपोद्घातप्रकरणे धर्मस्वरूपादिविचाराः निरूपिताः ।

द्वितीये ब्रह्मचारिप्रकरणे – गर्भाधानादिसंस्कारसंबद्धविषयाः तत्रापि विशेषतः उपनयनं तथा ब्रह्मचारिधर्माः पञ्चमहायज्ञानां फलादिकञ्च विवृतम् ।

तृतीये विवाहप्रकरणे – विवाहस्वरूपम्, विवाहभेदः इत्यादयः विवाहसंबद्धविषयाः निरूपिताः ।

चतुर्थे वर्णजातिविवेकप्रकरणे - सजातिपुत्राणां तथा अनुलोमविलोमादिविवाहोत्पन्नपुत्राणां च विवरणं कृतम् ।

पञ्चमे गृहस्थधर्मप्रकरणे – ग्रहस्थाश्रमविहितधर्माः, पञ्चमहायज्ञाः, श्रौतकर्माणि, सर्वसाधारणधर्माश्च चिन्तिताः ।

षष्ठे स्नातकधर्मप्रकरणे स्नातकनियमाः तथा उपाकर्म उत्सर्जनञ्च, इत्यादयः विषयाः निरूपिताः।

सप्तमे भक्ष्याभक्ष्यप्रकरणे - विहितनिषिद्धाहारभक्षणविषयः सप्रसङ्गोऽत्र विचारितः ।

अष्टमे द्रव्यशुद्धिप्रकरणे - स्वर्णपात्राणां शुद्धिविचारः, यज्ञपत्राणां शोधनादिविचारोऽत्र विशेषतः प्रतिपादितः ।

नवमे दानप्रकरणे - गोदानस्य महत्वं तथा अन्यदानानां विचाराश्च अत्र सूचिताः ।

दशमे श्राद्धप्रकरणे - श्राद्धपदार्थः श्राद्धभेदः अनुष्ठानक्रमश्च विचारितः ।

एकादशे - गणपतिकल्पप्रकरणे - विघ्नकारणानि तत्परिहारोपायः, तत्र महागणपतेः पूजादि विषयाः प्रतिपादिताः ।

द्वादशे ग्रहशान्तिप्रकरणे - नवग्रहपूजाविधानं समग्रतया सूचितम् ।

त्रयोदशे राजधर्मप्रकरणे - अभिषिक्तस्य राज्ञः राष्ट्ररक्षणोपायाः, दण्डव्यवस्थादिकञ्च सपरिकरं चिन्तितम् ।

**द्वितीये व्यवहाराध्याये -**

व्यवहारपदार्थः, साधारणव्यवहारस्वरूपं, असाधारणव्यवहारनिर्वहणविचारः, ऋणसंबद्धाः विचाराः, साक्षिस्वरूपनिरूपणं तत्र लेख्यम्, दिव्यमित्यादीनां विचारः । दायशब्दार्थः, दायविभागविचारः, सीमाविवादनिर्णयः. स्वामिपालविवादविचारः, अस्वामिकक्रयविचारः,

दत्ताप्रदानं क्रीतानुशयः, शुश्रूषाविचारः, तत्र प्रभेदश्च संविद्व्यतिक्रमः, वेतनादानविचारः, द्यूतविचारः

वाक्पारुष्यम्, दण्डपारुष्यम्, साहसविचारः, विक्रीयासंप्रदानप्रकरणम्, सामूहिकव्यापारविचारः, -स्तेय (चौर्यम्) विचारः, स्त्रीसंग्रहणविचारः, प्रकीर्णव्यवहारविचारः इत्यादयः बहवो विचाराः अत्र

निरूपिताः ।

तृतीये प्रायश्चित्ताध्याये -

आशौचविचारः, तत्र शुद्धिश्च, आपद्धर्मविमर्शः, वानप्रस्थस्य कर्तव्यं कर्म, यतिधर्मः, जीविनः उत्पत्तिक्रमः, तत्र कर्मणः कारणत्वविचारः, प्रायाश्चित्तविचारः, तत्र कर्मविपाकविचारः महापातकोपपातकानां स्वरूपं तत्र प्रायश्चित्तञ्च कृच्छ्राचरणं तत्स्वरूपं तत्प्रतिनिध्यादयः प्रायश्चित्तविचाराः एतत्प्रसङ्गप्रप्ताश्च विचाराः अत्र विशेषरूपेण परामृष्टाः ।

इत्येवं रूपेण याज्ञवल्क्यस्मृतौ प्रतिपादितविषयाणां सामान्यमुखेन परिचयद्वारा अस्याः याज्ञवल्क्यस्मृतेः स्थूलपरिचयः प्रदत्तः ॥

## १.३ नारदस्मृतिः– सामान्यपरिचयः

अस्याः नारदस्मृतेः “नारदीयमनुसंहिता " इत्यपि नामान्तरम् उपलभ्यते । याज्ञवल्क्यस्मृतेः द्वितीयस्य व्यवहाराध्यायस्य विषयः अस्याः स्मृतेः प्राधान्येन प्रतिपाद्यः विषयः। अस्यां स्मृतौ आरम्भे व्यवहार

दर्शनविधिनामके उपोद्घातप्रकरणे धर्मस्वरूपम् अत्यन्तम् औचित्यपूर्णं सुन्दरतया प्रदर्शितम् । यथा-

**न सा सभा यत्र न सन्ति वृद्धाः**

**न ते वृद्धा ये न वदन्ति धर्मम् ।**

**नासौ धर्मो यत्र न सत्यमस्ति**

**न तत्सत्यं यच्छलेनानुविद्धम् ॥ (ना.सं.- २-६०) इति ।**

“धर्ममार्गानुसारिणः वृद्धाः” इति कथ्यन्ते । यत्र सत्यमस्ति स एव धर्म भवेत् नान्यः । सत्यरहिरतस्तु धर्मः न भवति । यत्तु रागद्वेषासूयादिसहितं तत् सत्यमेव न भवति ।

रागद्वेषादियुक्तमनसा क्रियमाणं कथ्यमानं वा धर्म एव न भवति इति निषेधमुखेन रागद्वेषादिरहितं सुतरां परिशुद्धं एव”धर्मः” इति कथ्यते इति धर्मस्वरूपं सुस्पष्टं प्रदर्शितम् ।

अस्यां नारदस्मृतौ-आरम्भे उपोद्घातरूपेण “व्यवहारदर्शनविधिः" इति निरूप्य अग्रे “विवादपदम्” इति अध्यायापरनामधेयतया अवान्तरविभागः कृतः । तादृशानि अष्टादश विवादपदानि सन्ति । अन्ते दिव्यप्रकरणमिति अग्निदिव्यादिविषयकं दिव्यस्वरूपविभागादिसहितम् एकं प्रकरणम् ।

तत्र प्रथमे ऋणादानविवादपदे – ऋणदानस्वरूपविचारः तत्र स्वातन्त्र्यमस्वातन्त्र्यादिविचारः, आपद्धर्माः, धनस्वीकारे प्रमाणविचारः, साक्षिविचारः, इत्यादयः सविस्तरं प्रतिपादिताः ।

द्वितीये औपनिधिके विवादपदे – निक्षेपद्रव्यसामान्यलक्षणम्, उपनिधिद्रव्यलक्षणम्, तस्यापवादादिकं च अस्मिन्विवादपदे सूचितम् ।

तृतीये संभूयसमुत्थानविवादपदे – संभूयसमुत्थानार्थनिर्वचनम्, तत्र समस्याः, तत्परिहारश्च विचारिताः

चतुर्थे दत्ताप्रदानिके विवादपदे – दत्ताप्रदानिकस्य स्वरूपचिन्तनम्, तत्र देयानि, अदेयानि, इत्यादिविचाराः प्रदर्शिताः ।

पञ्चमे अभ्युपेत्याशुश्रूषाविवादपदे - अभ्युपेत्याशुश्रूषास्वरूपविमर्शः, शुश्रूषकधर्माः, अन्तेवासिधर्माः, दासत्वसम्पादनविमर्शः इत्यादयः विचाराः चिन्तिताः ।

षष्ठे वेतनस्यानपाकर्म प्रकरणे - भृतिदानादिविषयः, गोसंरक्षणादिविषयाः, पण्यस्त्रीविषयकदण्डादिविषयः

इत्यादयोऽस्मिन्प्रकरणे विवृताः ।

सप्तमे अस्वामिविक्रयविवादपदे – अस्वामिविक्रयस्वरूपं, तत्र दण्डादिकञ्च विचारितम् ।

अष्टमे विक्रीयासंप्रदानविवादपदे -विक्रीय असंप्रदानस्य स्वरूपं, तत्र दण्डादिविचारश्चात्र चिन्तितः। नवमे क्रीत्वानुशयविवादपदे –क्रीत्वानुशयस्य स्वरूपनिरूपणम्, तत्र प्रत्यर्पणव्यवस्यादिकञ्चात्र निरूपितम् ।

दशमे समयस्यानपाकर्मविवादपदे – पाषण्डादीनां राज्ञा परिपाल्यः तदपवादश्चात्र विचारितः ।

एकादशे क्षेत्रविवादप्रकरणे –क्षेत्रसीमादिविचारः, तन्निर्णयोपायाः, तत्र दण्ड्याः, अदण्ड्याः, द्विगुणादिदण्डप्रकल्पनादयः अत्र उपस्थापिताः ।

द्वादशे स्त्रीपुंसयोगविवादपदे – स्त्रीपुंसयोगस्य स्वरूपविचारः, कन्यासंस्कारादयः, कन्यादानविचारः, कन्यावरयोः दोषविचारः, निषिद्धगमनादिदण्डविचारः, अनुलोमप्रतिलोमजानां विवाहादिविचारश्चात्र विचारिताः ।

त्रयोदशे दायविभागविवादपदे - दायविभागस्वरूपविचारः, तस्य कालः, पुत्रीणां पुत्राणाञ्च विभागादि विचाराः अत्र चिन्तिताः ।

चतुर्दशे साहसविवादपदे - साहसलक्षणम्, साहसभेदाः, स्तेयविचाराश्चात्र विमृष्टाः ।

पञ्चदशे - षोडशे च विवादपदे - वाक्पारुष्यलक्षणं तद्भेदाः, तत्र दण्डविचारः तदपवादविचारश्चात्र मथिताः ।

सप्तदशे द्यूतसमाह्वयविवादपदे – द्यूतसमाह्वयस्य स्वरूपविचारः, जयपराजयविचारः, कूटाक्षदेविनो दण्डः, इत्यादयोऽत्र प्रदर्शिताः ।

अष्टादशे प्रकीर्णकविवादपदे - प्रकीर्णकक्रोडीकृताः विषयाः, राज्ञां कर्तव्यविचारः, ब्राह्मणस्य कर्मवृत्तिश्च अष्टौ मङ्गलानि, तेषां दर्शने विशिष्टफलनिरूपणम्, वर्णभेदेन दण्डभेदविचारः, इत्यादयः विवृताः ।

अन्तिमे दिव्यप्रकरणे –पञ्चदिव्यस्वरूपविचाराः, तेषु दिव्येषु अर्हानर्हविचारः, ब्रह्महत्यादौ दिव्यविनियोगविचारश्चात्र चिन्तिताः ।

इत्येवं रूपेण नारदस्मृतौ धर्मसम्बद्धविचाराः निरूपिताः इति संक्षेपः ।

## २. निबन्धग्रन्थानां परिचयः

**२.१ भगवन्तभास्करः –** भगवन्तभास्करनाम्ना संवलितः धर्मशास्त्रसंबद्धः निबन्धग्रन्थः धर्मशास्त्र निबन्धप्रस्थाने अत्यन्तं प्रसिद्धः । स्मृतिपुराणादिषु सामान्यतः उक्तस्य धर्मानुष्ठानसम्बद्धार्थस्य निबन्धग्रन्थेषु सरलतया विवरणं क्रियते । इदमेव निबन्धग्रन्थानां परममुद्देश्यम् । विद्वत्तल्लजेन विदुषा श्री नीलकण्ठभट्टवर्येण विरचितः अयं धर्मशास्त्रनिबन्धग्रन्थः । अस्य ग्रन्थरत्नस्य "भास्कर" इति अन्वर्था संज्ञा । धर्मानुष्ठानस्य मुख्यः कालः सञ्जाते भास्करोदये एव प्रवर्तते । भ्रान्तिनिरासोऽपि प्रकाशमूलक एवास्ति । प्रकाशश्च भास्कराधीनः । यथा वेदानं स्वतः प्रामाण्यं तथा भास्करस्यापि स्वतः प्रकाशकत्वम् । अस्मिन् महानिबन्धे द्वादश प्रकरणनि प्रतिपादितानि सन्ति। तेषां प्रत्येकं “मयूखेति” संज्ञा सार्था एव । अत्र मयूखेषु इमे विषयाः क्रमेण निरूपिताः ।

प्रथमे – संस्कारमयूखे – संस्कारोद्देशः संस्कारगणना, संस्कारविशेषः, मतभेदः, सापिण्डविचारः, स्त्रीधर्माः, वर्णजातिविवेकः, वर्णाश्रमादयः, कातीयसूत्रानुसारिसंस्कारप्रयोगः इत्यादयः विषयाः निरूपिताः सन्ति ॥

द्वितीये आचारमयूखे – आर्याणामचारवर्णनम्, इष्टानिष्टस्वप्नविचारः, दुःस्वप्नशान्त्यादिकं चात्र प्रतिपादिताः ।

तृतीये समयमयूखे – तिथिनिर्णयविचारः, उपाकर्मोत्सर्जनविचारः, अमानिर्णयः, संक्रान्तिनिर्णयः, जन्मादिकृत्यम्, कलिवर्ज्याणि चेति अनेके विषयाः चिन्तिताः ।

चतुर्थे श्राद्धमयूखे – श्राद्धपरिभाषा, अष्टका, अन्वष्टकैकोद्दिष्टादिश्राद्धानां विचारश्चेत्यादिविषया विवृताः।

पञ्चमे नीतिमयूखे – राजनीतिः साङ्गोपाङ्गरूपेण वर्णिता ।

षष्ठे व्यवहारमयूखे व्यवहारशब्दस्य परिभाषादयः, स्वत्वनिरूपणं तद्विभागश्च, दत्तकविचारादयः अत्र निरूपिताः।

सप्तमे दानमयूखे – दानपरिभाषा, विविधदानानां विशेषफलादिवर्णनञ्चात्र वर्णिताः ।

अष्टमे उत्सर्गमयूखे – जलाशय-वापी-कूप-तडागा-रामादीनां निर्माणविषयः, तत्फलम्, तद्विधानादिकमत्र चिन्तितम् ।

नमवे प्रतिष्ठामयूखे – विविधदेवमूर्तिप्रतिष्ठापनविधिः, क्रमश्चात्र प्रतिपादिताः ।

दशमे प्रायश्चित्तमयूखे – प्रायश्चित्तपरिभाषा, विविधपापापाकरणक्षमाणां प्रायश्चित्तानां वर्णनं, तद्विधिश्चात्र निरूपिताः ।

एकादशे शुद्धिमयूखे – शुद्धाशुद्धविवेचनम्, शास्त्रविहितकर्मसम्पादनार्थं शुद्धेरावश्यकता, विविधशुद्धिप्रकाराः चात्र दर्शिताः ॥

द्वादशे शान्तिमयूखे – शान्तिपरिभाषा, ग्रहयज्ञविचाराः, वास्तुकर्म, ग्रहणशान्त्यादिविचाराः, उत्पातशान्तिः, विविधशान्तयः, तत्प्रयोगविधिश्चेति विस्तरेण सर्वे विषयाः दर्शिताः । इत्येवं भगवन्तभास्करस्य संक्षेपपरिचयः ।

## २.२ निर्णयासिन्धुः - संक्षेपपरिचयः

श्रुतिस्मृतिपुराणादिबोधितान् धर्मानुष्ठानसम्बद्धान् विषयान् अत्यन्तं सरलतया सविमर्शं विस्तृतरुपेण विवृण्वन्ति धर्मशास्त्रनिबन्धग्रन्थाः । तत्र प्रसिद्धेषु निबन्धग्रन्थेषु निर्णयसिन्धुः अन्यतमः ।

काशीक्षेत्रे निवसता वेदवेदाङ्गादिशास्त्रेषु निष्णातेन महामहोपाध्यायेन कमलाकरभट्टवर्येण पूर्वतनान् सिद्धान्तग्रन्थान् आलोढ्य शास्त्रयुक्त्यादिविरुद्धानां मतानां खण्डनपुरस्सरं सर्वेषामेकवाक्यतया अयं मीमांसाप्रचुरो निर्णयसिन्धुनामा ग्रन्थो विरचितः । स चाद्य सर्वत्र अव्याहतत्वेन प्रसृतः सन् अखिलधर्मशास्त्रनिबन्धग्रन्थेषु चूडामणिरुपेण विराजते ।

अयं निबन्धग्रन्थः निर्णयसिन्धुः – प्रथमपरिच्छेदः, द्वितीयपरिच्छेदः, तृतीयपरिच्छेदः इत्येवं त्रिभिः परिच्छेदैः विभक्तः वर्तते । तत्र "सर्वाधारः कालः" इति न्यायेन सर्वेषां कार्याणामाधारः कालः भवतीति संवत्सरादिकालस्वरुपमारभ्य क्रमेण शास्त्रीयविषयाः निरूपिताः ।

प्रथमपरिच्छेदे - कालस्वरूपं तद्विभागनिरुपणं च तत्संबद्धाः प्रासङ्गिकाः विचाराः व्रतस्थधर्माः, तत्संबद्धाः विचाराः, प्रतिपदादिक्रमेण तिथिनिर्णयः, ग्रहणविचारः, इत्यादयः विचाराः विस्तरेण प्रतिपादिताः ॥

द्वितीयपरिच्छेदे-क्रमेण चैत्रादिमासेषु विहितानां व्रतपूजाहोमादिकृत्यानां कालादिनिर्णयः, तत्र मतभेदाः, तत्संबद्धानि प्रमाणानि च इत्यादयः विषयाः विशेषरूपेण निरुपिताः ।

तृतीयपरिच्छेदे – गर्भाधानपुंसवनसीमान्तादीनां संस्काराणाम्, तत्समबद्धकालविशेषादीनां च विचारः, वापीकूपादिनिर्माणसंबद्धाः कालादिविचाराः, मूर्तिप्रतिष्ठसंबद्धविचाराः शान्तिकर्मणां निर्णयः, कलियुगवर्ज्यविचारः, श्राद्धप्रकरणम्, तत्सम्बद्धाः विचाराः, आशौचविचारः सपरिकरः, अन्त्यकर्मसाधारणविधिः, उत्तरसंस्कारस्य विचारः, विधवाधर्माः, सन्यासस्वीकारविधिः, तत्संबद्धाः नियमादयः, यतिसंस्कारविचारः, सन्यासभेदविचारः, यतिसंस्कारविचारः इत्यादयः विचाराः

प्रासङ्गिकाश्चात्र विशेषरुपेण निरुपिताः । इत्येवं निर्णयसिन्धुः धर्मानुष्ठानादिविषये अत्यन्तमुपकारको वर्तते इति सामान्यपरिचयः ॥

## २.३ धर्मसिन्धुः

श्रीमता पण्डितवर्येण काशीनाथोपाध्यायेन विरचितः “धर्मसिन्धुः" नामकः धर्मशास्त्रनिबन्धग्रन्थः सर्वजनादरणीयतया विराजते । वेद-स्मृतिपुराणादिषु येषां अनुष्ठेयत्वेन अनुसर्तव्यत्वेन वा सूक्ष्मरूपेण विधानमस्ति तेषां विषयाणां सरलतया विस्ताररूपेण सामान्यमतीनामपि अवबोधो यथास्यात् तथा विवरणमेव निबन्धग्रन्थानां परममुद्देश्यं परमं प्रयोजनं वा ।

अस्मिन् निबन्धगन्थेऽपि अनुष्ठेयविषयाणाम् अत्यन्तं सरलतया विवरणं दत्तमस्ति ।

अस्मिन् ग्रन्थे प्रथमपरिच्छेदः - द्वितीय परिरच्छेदः - तृतीयपरिच्छेदः इत्येवंरूपेण परिच्छेदत्रयेण शास्त्रीयविषयाणां विवरणं कृतम् । तृतीयपरिच्छेदे परं पूवार्धोत्तरार्धभेदेन विभागद्वयं दृश्यते । विशेषरुपेण निर्णयसिन्धौ ये शास्त्रीयविषयाः प्रतिपादिताः तेषां बहूनां विषयाणां संक्षिप्यकथनमिव क्वचित् अनुभूयते । परं निर्णयसिन्धौ यत्र निर्णयः स्पष्टतया नोक्तः, तत्रापि युक्त्यादिप्रदर्शनद्वारा निर्णयः प्रदर्शितः इति अस्य वैशिष्ट्यम् । बहुत्र "ममत्वेवं भाति” “अत्रायं विशेषः अत्रायं निर्णयः” इत्यादिना स्पष्टरूपेण कथनं निबन्धग्रन्थस्यास्य महत्वं प्रदर्शयति । क्वचित् देशाचार-कुलाचारादिरुपेण संप्रदायपद्धतिं प्रदर्श्य यत्र आचारविषये मूलप्रमाणं नोपलभ्यते तत्र एतन्मूलं मृग्यम् अन्वेषणीयम् इति वा – [मूलं नोपलभ्यते इत्यस्य सूचकरुपेण वा कथनम्] इत्यादिना स्पष्टीकरणमपि लभ्यते ।

अत्र प्रथमपरिच्छेदे - सङ्क्रान्तिनिर्णयः, मासादिकालनिर्णयविचारः, तिथिनिर्णयः, ग्रहणविचारः, द्वितीयपरिच्छेदे - वत्सरारम्भविचारः, चैत्रादिमासेषु विहितानां नित्यनैमित्तिकादिकर्मणां कालादिविमर्शः, तान्निर्णयः तत्फलादिस्वरूपनिरूपणं चात्र कृतं वर्तते ।

तृतीयपरिच्छेदे पूर्वार्धे - गर्भाधानादिसंस्काराः निरूपिताः, तथैव तत्सम्बद्धाः कालादयः, गोत्रप्रवरविचारः, मूर्तिप्रतिष्ठाविचारः, कलौ निषिद्धकर्मादिविचारः इत्यादयः तृतीयपरिच्छेदस्य पूर्वार्धे चिन्तिताः।

तृतीयपरिच्छेदस्य उत्तरार्धे तु-

जीवत्पितृककर्तव्यकर्मविशेषः, श्राद्धविचारः-सपरिकरः, आशौचप्रकरणम्, अन्त्यक्रियासंबद्धविचाराः, सन्यासविधिः, सन्यासभेदः, मृतयतिसंस्कारविचारादयः अस्मिन् तृतीयपरिच्छेदस्य उत्तरार्धे निरूपिताः । इत्येवं प्रकारेण धर्मसिन्धुग्रन्थः धर्मशास्त्रस्य निबन्धप्रस्थाने अन्त्यन्तं प्रसिद्धः ।

## ३. स्मृतिशास्त्रस्य प्रतिपाद्यविषयाः

**३.१ आचारः -** आचारः धर्मस्य ज्ञापको हेतुः।

तदुक्तं याज्ञवल्क्यस्मृतौ -

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**

**सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥** (या.व.स्मृ आ.अ. ७)

अत्र सदाचारः - सतां शिष्टानामाचारोऽनुष्ठानम् ।

शिष्टानामनुष्ठानरूपः आचारोऽपि धर्मे प्रमाणम् । अयं च आचारः प्रबलप्रमाणभूतायाः श्रुतेः स्मृतेश्च अविरुद्धः स्यात् । पूर्वपूर्वप्रमाणस्य बलीयस्त्वात् ।

**यस्मिन्देशे य आचारः पारम्पर्यक्रमागतः ।**

**श्रुतिस्मृत्यविरोधेन सदाचारः स उच्यते ॥ (म.स्मृ.)**

स्कन्दपुराणेप्युक्तम् -

**“रागद्वेषविनिर्मुक्तैर्विद्वद्भिर्यदनुष्ठितः ।**

**सदाचारः स विज्ञेयो धर्ममूलो मनीषिभिः” । इति ।**

रागद्वेषादिरहितैः शुद्धान्तरङ्गैः यदनुष्ठितः क्रियाविशेषः स सदाचारः इति कथ्यते । स तु धर्मप्रमाणम् इत्यर्थः ।

**३.२ व्यवहारः –**

**विः नानार्थे अवसन्देहे हरणं हार उच्यते ।**

**नाना-सन्देहहरणात् व्यवहार इति स्मृतः । (का.स्मृ.)**

इति व्यवहारपदस्य निर्वचनं कृतम् । तथा शास्त्रं केवलमाश्रित्य क्रियते यत्र निर्णयः। व्यवहारः स विज्ञेयः इत्यादिना बृहस्पतिस्मृतौ निरूपितं च ।

अन्यविरोधेन स्वात्मसंबन्धितया कथनं व्यवहारः । यथा - कश्चित् इदं मदीयमिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति । स च व्यवहारः अनेकविधः । अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न संभवति । दुष्टपरिज्ञानं च - व्यवहारदर्शनेनैव संभवति । "व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम्" इत्यनेन प्रदर्शितम् । स च व्यवहारः कीदृशः, कतिविधः, कथञ्चेत्यादिकं सर्वं याज्ञवल्क्यस्मृतौ द्वितीयाध्याये महता प्रबन्धेन अभिहितम्।

३.३ **प्रायश्चित्तम् –**

पापपरिहारार्थम् अनुष्ठेयत्वेन शास्त्रविहितं कर्म । प्रायस्य पापस्य चित्तं विशोधनम् । पापशोधकत्वात् प्रायश्चित्तम् । प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्' निश्चयसंयुक्तं पापक्षयसाधनत्वेन निश्चितम् इति वा । कर्मदोषाः त्रिविधाः भवन्ति । तत्परिहारार्थं शास्त्रविहितं प्रायश्चित्तमवश्यम् अनुष्ठेयम् । शरीरद्वारा कृतनिषिद्धकर्मजन्यदोषवशात् मनुष्यः स्थावरत्वं प्राप्नोति । वाचिकदोषवशात् पक्षिमृगजन्मप्राप्नोति । मानसदोषवशात् अन्त्यजजन्मप्राप्नोति । तत्परिहारार्थं प्रायश्चित्तं कर्तव्यमित्याह महर्षिः मनुः –

शरीरजैः कर्मदोषैः याति स्थावरतां नरः ।

वाचिकैः पक्षिमृगतां मानसैः अन्त्यजातिताम् ॥ इति । (म.स्मृ.12.9)

प्रायश्चित्तानुष्ठानस्य आवश्यकता का इति प्रदर्शयति मनुः –

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ।

निन्द्यैर्हि लक्षणैर्युक्ता जायन्ते अनिष्कृतैनसः ॥ इति । (म.स्मृ.11.53)

यस्मात् अनिष्कृतम् अनाशितम् एनं पापं, यैः ते अनिष्कृतैनसः, अकृतप्रायश्चित्ताः, परलोकोपभुक्तपापशेषेण, निन्द्यलक्षणैः कुनखित्वादिभिः युक्ताः जायन्ते । तस्मात् विशुद्धये पापनिर्हरणार्थं प्रायश्चित्तं सर्वदा कर्तव्यम् । पापक्षयार्थिनः एव अत्र अधिकारिणः । अमुमेवार्थं भगवान् याज्ञवल्क्यः अपि स्फुटयति –

**विहितस्य अननुष्ठानात् निन्दितस्य च सेवनात् ।**

**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥ (या.व.स्मृ.3.219)**

**तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ॥ (या.व.स्मृ.3.220) इति ॥**

पतनमृच्छति पापं प्राप्नोतीत्यर्थः । विशुद्धये पापविनाशाय ।

प्रायश्चित्तस्य अकरणे को दोषः इति चेत् तत्राह महर्षिः याज्ञवल्क्यः –

**प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ।**

**अपश्चात्तापिनः कष्टान् नरकान् यान्ति दारुणान् ॥ (या.व.स्मृ.3.221) इति ॥**

पापेषु शास्त्रार्थविरुद्धकार्यकरणजनितेषु प्रसक्ताः पुरुषाः, अपश्चात्तापिनो 'मया दुष्कृतं कृतम्' इत्येवमुद्वेगरहिताः प्रायश्चित्तमकुर्वाणाः दुःसहान् नरकान् प्राप्नुवन्ति । एवञ्च नरकादिदुःखकारणीभूतानां पापानां परिहारार्थं शास्त्रविहितानि प्रायश्चित्तानि अवश्यमनुष्ठेयानि ।

## ४. आश्रमाणां परिचयः

**४.१ ब्रह्मचर्याश्रमः** - चतुर्षु, आश्रमेषु, प्रथमः आश्रमः ब्रह्मचर्याश्रमः । जन्मतः उपनयनपर्यन्तं आश्रमपदव्यवहारो नास्ति । तावत्पर्यन्तं बालः । उपनयनानन्तरं विवाहपर्यन्तं ब्रह्मचर्यमिति ।

ब्रह्मशब्दस्य - "वेदः" इत्यर्थः । तदध्ययनार्थं व्रतमपि ब्रह्म । ब्रह्मणि चरतीति ब्रह्मचारी । अग्निकार्यभिक्षाटनसमिधाहरणादिनियमपूर्वकं वेदाध्ययनशीलः इत्यर्थः ।

(गर्भाष्टमे जन्मतः सप्तमे वर्षे) अष्टमे वा वर्षे ब्राह्मणस्य उपनयनम् । क्षत्रियाणां गर्भतः एकादशे (जन्मतः दशमे) एकादशे वर्षे वा उपनयनम् । वैश्यानां गर्भद्वादशे (जन्मत एकादशे वर्षे) द्वादशे वर्षे वा उपनयनमिति त्रैवर्णिकानाम् उपनयनकालः याज्ञवल्क्यस्मृतौ प्रदर्शितः । अयं कालः श्रुतिबोधितः तथा स्मृत्यन्तराविरुद्धश्च । उपनयनस्य आन्तिमावधिस्तु षोडशवर्षपर्यन्तं ब्राह्मणस्य उपनयने अन्तिमावधिः । क्षत्रियस्य द्वविंशतिवर्षाणि, तथा वैश्यानां चतुर्विंशतिवर्षाणि । अतःपरं उपनयनस्य कालो नास्ति ।

तच्च ब्रह्मचर्यं द्विविधम् । उपकुर्वाणब्रह्मचर्यम्, नैष्ठिकब्रह्मचर्यं चेति । साङ्गतदर्थसहितं वेदाध्ययनं कृत्वा "अधीत्य स्नायात्" इति स्मृतिवचनबलात् समावर्तनं कृत्वा ततः गृहस्थाश्रमी भवति सः उपकुर्वाणब्रह्मचारी भवति । यः वेदाध्ययनानन्तरमपि गुरुगृहे एव तिष्ठति सः नैष्ठिकः ब्रह्मचारीति । तदुक्तं याज्ञवल्क्येन-

नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसान्निधौ । इत्यादिना। तावतैव तस्य जीवनसंपूर्तिरिति ।

**४.२ गृहस्थाश्रमः** - द्वितीयः आश्रमः गृहस्थाश्रमः । न गृहं गृहमित्याहुः । गृहिणी गृहमुच्यते । इत्यादिना गृहिणीयुक्त एव “गृहस्थः" इत्यर्थः। ब्रह्मचर्यानन्तरं समावर्तनं कृत्वा गृहस्थो भवेदित्याह ।

भगवान् याज्ञवल्क्यः - अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् इत्यादिना । तस्याः पालनपोषणादिकं भर्तुः कर्तव्यमेव । तदुक्तं मनुना -पिता रक्षति कौमारे भर्ता रक्षति यौवने इत्यादिना । गृहस्थेन आग्निसाध्यानि श्रौतस्मार्तानि कर्माणि कर्तव्यानि । दम्पत्योः सहाधिकारात् यागादौ ।

**४.३ वानप्रस्थाश्रमः** – चतुर्षु आश्रमेषु तृतीयः आश्रमः वानप्रस्थाश्रमः । गृहस्थाश्रमं समाप्य वानप्रस्थाश्रमं प्रविशेत् इति शास्त्रविधिः । तदुक्तं मनुना -

**गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।**
**अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् (म.स्मृ. – ७.२.)**

गृहस्थः यदा वयोवस्थाविशेषमनुसृत्य शरीरस्य शिथिलतां प्राप्नोति तथा पुत्रस्यापि सन्ततिः उत्पद्यते, (पौत्रदर्शनमपि भवतीत्यर्थः) तदा वानप्रस्थाश्रमं प्रविशेदित्यर्थः। कथं वनं गच्छेत् इति सन्देहे क्रमं प्रदर्शयति मनुः ।

**सन्त्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् ।**
**पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा (म.स्मृ.७.३)**

व्रीहियवादिरूपं भक्ष्यं सर्वं परित्यज्य तथा गवश्वादिसर्वं सम्पद्गणं परित्यज्य वनं गच्छेत् । स्वभार्या जीवति चत् पुत्राणां निकटे स्थाप्य गन्तव्यम् । यदि सा वनमागन्तुं इच्छति आत्मना सह नेतव्या ।

तथा इतोपि नियमाः प्रदर्शिताः ।

**आग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम् ।**
**ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः । (म.स्मृ.७.५.)**

श्रौताग्निम् औपासनाग्निं स्रुक्स्रुवादिरूपाणि यज्ञपात्राणि च गृहीत्वा ग्रामादरण्यं गत्वा विजितेन्द्रियः तत्र वसतिं कुर्यात् । तत्र च आरण्यानि शाकमूलफलादीनि च भक्षणं कुर्वन् तैरेव द्रव्यैः नित्यकर्मत्वेन विहितानि महायज्ञादिकर्माणि निर्वर्तयेत् । नित्यं त्रिकालस्नानम् सन्ध्याजपाद्यनुष्ठानानि कुर्वन् तैरेव वन्यैः फलादिभिः अतिथिसत्कारादिकञ्च कुर्यात् । वेदाध्ययनं कुर्वन् प्रतिग्रहनिवृत्तः सर्वभूतेषु कृपावान् श्रौतस्मार्तादिविहितं कर्म अनुतिष्ठन् च निवसेत् ।

एवमनुतिष्ठन् ऋणत्रयमपाकृत्य मोक्षे मनः स्थापयेत् । तदर्थं सन्यासाश्रमविषये चिन्तनं कुर्वन् प्रापञ्चिकं वैराग्यं सम्पाद्य सन्यसेत् ।

**४.४ सन्यासाश्रमः** - ऋणत्रयापाकरणेन नित्यनैमित्तिकादिकर्मानुष्ठानेन चित्तशुद्धिं प्राप्य प्रापञ्चिकं वैराग्यं च सम्पाद्य सन्यासग्रहणं कुर्यात् । तत्र क्रमः प्रदर्शितः मनुना -

**"प्राजापत्यां निरुप्येष्टिं सर्ववेदसदक्षिणाम् ।**

**आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रवृजेत् गृहात् । (म. स्मृ. ७.३४) ।**

अयं क्रमः वानप्रस्थाश्रमस्थस्य सन्यासग्रहणविषये । यथा - यजुर्वेदविहितां सर्वस्वदक्षिणां प्रजापतिदेवताकां विश्वजित् नामिकामिष्टिं कृत्वा वानप्रस्थाश्रममनुष्ठायैव चतुर्थं सन्यासाश्रमं प्रविशेत् सन्यासग्रहणं कुर्यादिति यावत् । एवं चतुर्णामाश्रमाणां समुच्चयः मनुना दर्शितः । तथा श्रुत्या एतेषां समुच्चयः विकल्पश्च प्रदर्शितः। तत्र जाबालश्रुतिः- "ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रवृजेत्" इतरथा ब्रह्मचर्यादेव प्रवृजेत् । गृहाद्वा वनाद्वा ॥ इति। सः सर्वेभ्यः स्थावरजङ्गमेभ्यः अभयं दत्वा ब्रह्मप्रतिपादकम् उपनिषन्निष्ठं हिरण्यगर्भादेर्लोकं प्राप्नोति ।

अयं च सन्यासः चतुर्धा विभक्तः - तदुक्तं महाभारते - कुटीचकः, बहूदकः, हंसः, परमहसश्चेति। सन्यासस्य परमं प्रयोजनमाह मनुः –

एवं सन्यासस्य कर्माणि स्वकार्यपरमोऽस्स्पृहः ।
सन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥ इति ॥

एवं प्रकारेण जीवनं यापयन् सन्यासी आग्निहोत्रादि गृहस्थकर्माणि परित्यज्य आत्मसाक्षात्कारस्वरुपस्वकार्यप्रधानः, स्वर्गादावपि बन्धहेतुतया निस्पृहः सन् प्रवृज्यया पापानि विनाश्य ब्रह्मसाक्षात्कारेण परमां गतिं मोक्षरूपां प्राप्नोतीति ॥

**५. प्राचीनन्यायव्यवस्थायाः वैशिष्ट्यम् –**

मनुयाज्ञवल्क्यादिस्मृतिषु न्यायनिर्णयार्थं न्यायव्यवस्था राजधर्मान्तर्गत्वेन विशेषेण प्रतिपादिता । तदुक्तं मनुना – व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।

मन्त्रज्ञैः मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ॥ (म.स्मृ.8.1)

प्रजानां रक्षणार्थं प्राप्तवृत्तिः राजा प्रजानाम् इतरेतरविवादजन्यपीडापरिहारार्थम् ऋणदानाद्यष्टादशविवादे विरुद्धार्थवादिप्रतिवादिवाक्यजनितसन्देहपरिहारार्थं विचार एव व्यवहारः। तदुक्तं कात्यायनेन –

**वि-नानार्थे अव सन्देहे हरणं हार उच्यते ।**

**नानासन्देहहरणात् व्यवहार इति स्मृतः ॥ इति ।**

तान् व्यवहारान् द्रष्टुमिच्छन् राजा आत्मगुणादियुक्तैः ब्राह्मणैः अमात्यैश्च सह विनीतो वाक्पाणिपादचापल्यविरहात् अनुद्धतः सभां प्रविशेत् । इदं च व्यवहारदर्शनं प्रजानां परस्परपीडायां तत्वनिर्णयेन रक्षणार्थं तथा दृष्टादृष्टार्थकरणफलेनैव फलवत् भवति । ततश्च ऋणादानादीनि कार्याणि अष्टादशसु व्यवहारमार्गेषु विषयेषु पठितानि देशजातिकुलव्यवहाराद्यवगतैः शास्त्रावगतैः राशिद्रव्यादिभिश्च पृथक् पृथक् प्रत्यहं विचारयेत् । यदा कार्यान्तरवशात् रोगादिना वा राजा स्वयं कार्यदर्शनं कर्तुं न शक्नोति । तदा तदर्थं न्यायनिर्णयसमर्थं ब्राह्मणं नियोजयेत् । तदुक्तं मनुना –

**यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।**

**तदा नियुञ्ज्यात् विद्वांसं ब्राह्मणं कार्यदर्शने ॥ इति । (म.स्मृ.8.9)**

स तु विद्वान् ब्राह्मणः अस्य राज्ञो द्रष्टव्यानि कार्याणि धार्मिकैः कार्यदर्शनाभिज्ञैः त्रिभिः ब्राह्मणैः सह सभां प्रविश्य तादृश ऋणादानादीनि कार्याणि पश्येत् । तदुक्तं मनुना –

**सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः ।**

**सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥ (म.स्मृ.8.10)** इत्यनेन ।

अत्र साक्षिणः के भवितुमर्हन्तीति मनुरेव सूचितवान् –

**गृहिणः पुत्रिणो मौलाः क्षत्रविट्छूद्रयोनयः ।**

**अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥ इति । (म.स्मृ.8.62)**

कृतदारपरिग्रहाः पुत्रवन्तः तद्देशजाः क्षत्रियवैश्यशूद्रजातीयाः अर्थिनिर्दिष्टाः सन्तः साक्षित्व योग्या भवन्ति । न तु ये केचित् ऋणादानादिव्यवहारेषु साक्षिणः स्युः ।

भगवान् याज्ञवल्क्योऽपि न्यायनिर्णयविषये व्यवहाराध्याये एवमेव स्वरूपादिकं प्रदर्शयामास । तथा हि – अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः । तच्च दुष्टनिग्रहमन्तरेण न सम्भवति । स च व्यवहारः कीदृशः, कतिविधः, कथञ्चेत्यादीतिकर्तव्यताकलापोऽत्र प्रदर्श्यते । तदुक्तम् –

**व्यवहारान् नृपः पश्येद्विद्वद्भिः ब्राह्मणैः सह ।**

**धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥ (या.स्मृ.व्य.अ.01) इति ॥**

अन्यविरोधेन स्वात्मसम्बन्धतया कथनं व्यवहारः । यथा कश्चित् इदं क्षेत्रादि मदीयमिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति वदति । तच्च अनेकविधम् । विद्वद्भिः वेदव्याकरणादिधर्मशास्त्राभिज्ञैः ब्राह्मणैः इति । 'ब्राह्मणैः सह' इति तृतीया निर्देशात् तेषामप्राधान्यम् । अतश्च अदर्शने अन्यादर्शने वा राज्ञो दोषः न ब्राह्मणानाम् । न्यायनिर्णायकाः सभ्याः कीदृशाः भवेयुः इति चेत् – श्रुताध्ययनसम्पन्ना धर्मज्ञा सत्यवादिनः ।

राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥ (या.स्मृ.व्य.अ.02)

श्रुताध्ययनसम्पन्नाः मीमांसाव्याकरणादिश्रवणेन वेदाध्ययनेन च सम्पन्नाः, धर्मशास्त्रज्ञाः, सत्यवचनशीलाः रागद्वेषादिरहिताः रिपौ मित्रे च ये समाः । एतादृशगुणवन्तः सभासदः न्यायनिर्णेतारः राज्ञा नियोक्तव्याः ।

राज्ञा नियुक्ताः न्यायनिर्णायकाः प्राड्विवाकादयः सभ्याः यदि रागादिना न्यायविरुद्धं व्यवहारं विचारयन्ति तदा ते राज्ञा दण्ड्याः । ते तु पृथक् पृथक् एकैकशः विवादपराजयनिमित्तात् दण्डात् द्विगुणदण्डेन दण्ड्याः । तदुक्तम् –

रागाल्लोभाद्भयाद्वाऽपि स्मृत्यपेतादिकारिणः ।

सभ्याः पृथक् पृथक् दण्ड्या विवादाद्द्विगुणं दमम् ॥ इति ।(या.स्मृ.व्य.अ.04)

व्यवहारविषयः कः भवति इत्युक्तौ 'तत्सूचितम्' स्मृत्याचारव्यपेतेन मार्गेणऽ...... परैः ।

आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ इति । (या.स्मृ.व्य.अ.05)

धर्मशास्त्रविरुद्धेन मार्गेण परैः अभिभूतो यद्राज्ञे प्राड्विवाकाय वा विज्ञापयति तत् आवेद्यमानं व्यवहारस्य विषयः भवति । तस्य च इदं सामान्यलक्षणम् । तत्र च साक्षिस्वरूपं प्रदर्शयति –

**प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।**

**एषामन्यतमाभावे दिव्यान्यन्यतममुच्यते ॥ (या.स्मृ.व्य.अ.22)**

प्रमीयते परिच्छिद्यते अनेनेति प्रमाणम् । तच्च द्विविधम् – मानुषं दैविकञ्चेति । तत्रापि मानुषं प्रमाणं त्रिविधम् – लिखितम्, भुक्तिः, साक्षिणश्चेति कीर्तितं महर्षिभिः । एषां मानुषसाक्षिषु अन्यतमाभावे दिव्यानि प्रमाणानि स्वीकर्तव्यानि । तानि च तुला, अग्निः, आपः, विषम्, कोशः दिव्यानीह विशुद्धये इत्युक्तम् । तुलादीनि कोशान्तानि पञ्च दिव्यानि इह धर्मशास्त्रे सन्देहनिवृत्तये दातव्यानि इति । एवम् एतादृशसाक्षिप्रमाणैः साधनैः तथा कुशलैः न्यायनिर्णेतृभिश्च सह राजा धर्मसम्मतं न्यायनिर्णयं कुर्यात् इति प्राचीना स्मृतिबोधिता न्यायव्यवस्था ।

****************